ॐ नमो ईशान दिशायां ईशानः सहपरिवारो देवता प्रत्यधिदेवतास्तद्दिक्षु उन्मत्तको नाम राक्षस-स्यतस्य अष्टादशकोटि-भूत-प्रेत-पिशाच-ब्रह्मराक्षस-शाकिनी-डाकिनी-काकिनी-हाकिनी-राकिनी-याकिनी-लाकिनी-बैतालकामिनी ग्रहान् बन्धयामि मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष माचल-माचल आक्रामय-आक्रामय महावज्रकवचा यास्त्राय राज-चौर-सर्प-सिंह-व्याघ्राग्नि सर्वोपद्रव नाशय-नाशय स्वाहा। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लूं फ्रों आं ह्रीं क्रों ह्रूं फट् स्वाहा। वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अवब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय-स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ ऊर्ध्वदिशायां ऊर्ध्वः सहपरिवारो देवता प्रत्यधिदेवतास्तद्दिक्षु आकाशवासी नाम राक्षसस्य-तस्य अष्टादशकोटि-भूत-प्रेत-पिशाच-ब्रह्मराक्षस-शाकिनी-डाकिनी-काकिनी-हाकिनी-राकिनी-याकिनी-लाकिनी-बैतालकामिनी ग्रहान् बन्धयामि मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष माचल-माचल आक्रामय-आक्रामय महावज्रकवचायास्त्राय राज-चौर-सर्प-सिंह-व्याघ्राग्नि सर्वोपद्रव नाशय-नाशय स्वाहा। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लूं फ्रों आं ह्रीं क्रों ह्रूं फट् स्वाहा। वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अवब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय-स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो अधस्तदिशायां वासुकी सहपरिवारो देवता प्रत्यधिदेवतास्तद्दिक्षु पातालवासिनी नाम-राक्षसस्यतस्य अष्टादशकोटि-भूत-प्रेत-पिशाच-ब्रह्मराक्षस-शाकिनी-डाकिनी-काकिनी-हाकिनी-

राकिनी-याकिनी-लाकिनी-बैतालकामिनी ग्रहान् बन्धयामि मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष माचल-माचल आक्रामय-आक्रामय महावज्रकवचायास्त्राय राज-चौर-सर्प-सिंह-व्याघ्राग्नि सर्वोपद्रव नाशय-नाशय स्वाहा। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लूं फ्रों आं ह्रीं क्रों ह्रूं फट् स्वाहा। वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अवब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय-स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो अवान्तरदिशायां विष्णुः सहपरिवारो देवता प्रत्यधिदेवतास्ताद्दिक्षु महाभीमको नाम राक्षसस्यतस्य अष्टादशकोटि-भूत-प्रेत-पिशाच-ब्रह्मराक्षस-शाकिनी-डाकिनी-काकिनी-हाकिनी-राकिनी-याकिनी-लाकिनी-बैतालकामिनी ग्रहान् बन्धयामि मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष माचल-माचल आक्रामय-आक्रामय महावज्रकवचायास्त्राय राज-चौर-सर्प-सिंह-व्याघ्राग्नि सर्वोपद्रव नाशय-नाशय स्वाहा। ॐ ह्रां ह्रीं ह्रूं श्रीं क्लीं क्लूं फ्रों आं ह्रीं क्रों ह्रूं फट् स्वाहा। वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अवब्रह्मद्विषो जहि। ॐ नमो भगवते रुद्राय-स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो पूर्व दिशायां ॐ नमो भगवति इन्द्राणि वज्रहस्ताभ्यां मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो अग्नि दिशायां ॐ नमो भगवति अग्निज्वाले शक्तिहस्ताभ्यां मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो दक्षिण दिशायां ॐ नमो भगवति यमि कालदण्डहस्ताभ्यां मम सपरिवारकस्य सर्वतो माम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव-ब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो नैर्ऋतिदिशायां ॐ नमो भगवति निर्ऋति खड्गकंकालहस्ताभ्यां मम सपरिवारकस्य सर्वतो माम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्य-वब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो पश्चिमदिशायां ॐ नमो भगवति वारुणि पाशहस्ताभ्यां मम सपरिवारकस्य सर्वतो माम् रक्ष रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव-ब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो वायव्य दिशायां ॐ नमो भगवति वायविध्वजहस्ताभ्यां मम सपरिवारकस्य सर्वतो माम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो उत्तरदिशायां ॐ नमो भगवति कौबेरि गदांकुशहस्ताभ्यां मम सपरिवारकस्य सर्वतो माम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यव-ब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो ईशानदिशायां ॐ नमो भगवति ईशानि त्रिशूलहस्ताभ्यां मम सपरिवारकस्य सर्वतोमाम् रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो उर्ध्वदिशायां ॐ नमो भगवति ब्रह्माणि स्रक्-स्रूव-कमण्डलू अक्ष-सूत्रां कुश हस्ताभ्यां मम सपरिवारकस्य सर्वतो माम रक्ष-रक्ष हूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते. रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो अधस्तदिशायां ॐ नमो भगवति पातालवासिनी विषगरलहस्ताभ्यां मम सपरिवारकस्य सर्वतो माम् रक्ष-रक्ष ह्रूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

ॐ नमो अवान्तरदिशायां ॐ नमो भगवति श्रीमहालक्ष्मी पद्महस्ताभ्यां मम सहपरिवारकस्य सर्वतो माम् रक्ष-रक्ष ह्रूं फट् स्वाहा। ॐ वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः। रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषोजहि। ॐ नमो भगवते रुद्राय स्वाहा। ॐ नमो भगवते भैरवाय स्वाहा। ॐ नमो भगवते गणेश्वराय स्वाहा। ॐ नमो दुर्गायै स्वाहा।

शिरो रक्षतु ब्रह्माणि मुखं माहेश्वरी तथा। कण्ठं रक्षतु वाराही ऐन्द्री चैव भुजद्वयम्।
चामुण्डा हृदयं रक्षेत् कुक्षिं रक्षेच्च वारुणी। वैष्णवी रक्ष पादौ मे पृष्ठदेशे धनुर्धरी॥
यथाग्रामे तथा क्षेत्रे रक्षस्व मां पदे पदे।
सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थ साधिके। शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तुते॥

ॐ ब्राह्मि माहेश्वरि कौमारि वैष्णवि वाराहि इन्द्राणि चामुण्डे सिद्धचामुण्डेश्वरि गणेश्वरि क्षेत्रपाल नारसिंही महालक्ष्मि सर्वतो दुर्गे ह्रूं फट् स्वाहा। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा। ॐ ऐं ह्रीं श्रीं दुं ह्रूं फट्।

ॐ कनकवज्रवैदुर्य-मुक्तालंकृतभूषणे एहि-एहि आगच्छ-आगच्छ मम कर्णे प्रविश्य भूत-भविष्य-वर्तमान-कालज्ञान-दूरदृष्टि-दूरश्रवणं ब्रूहिं ब्रूहिं अग्निस्तम्भन-शत्रुस्तम्भन-शत्रुमुखस्तम्भन

शत्रुगतिस्तम्भन-शत्रुमतिस्तम्भन परेषां गतिं मतिं शत्रूणां वाग्जृम्भणं स्तम्भनं कुरु कुरु शत्रुकार्य हानिकरि मम कार्यसिद्धकरि शत्रूणामुद्योगविध्वंसकरि वीरचामुण्डिनि हाटक-हाटकधारिणि नगरीपुरी पट्टण-आस्थान-आस्थित-सम्मोहिनी असाध्यसाधिनी ॐ ह्रीं श्रीं देवि हन हूं फट् स्वाहा। ॐ ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा।

ॐ आं ह्रीं सौं ऐं क्लीं ह्रूं सौः ग्लौं श्रीं क्रौं एहि एहि भ्रमराम्बा हि सकलजगन्मोहयाय मोहनायै सकल अण्डज-पिण्डजान् भ्रामय-भ्रामय राजा-प्रजावशंकरी सम्मोह्य-सम्मोह्य महामाये अष्टादशपीठ-रूपिणी अमल वरयूँ स्फुर-स्फुर प्रस्फुर-प्रस्फुर कोटिसूर्यप्रभा-भासुरी चन्द्र जटी मां रक्ष-रक्ष मम शत्रून् भस्मीकुरु-भस्मीकुरु विश्वमोहिनी हुं क्लीं हुं हुं फट् स्वाहा।

ॐ नमो भगवते कामदेवाय इन्द्राय वसाबाणाय इन्द्र सन्दीपबाणाय क्लीं क्लीं सम्मोहन बाणाय ब्लूं ब्लूं सत्तापनबाणाय सः सः वशीकरणबाणाय कम्पित-कम्पित ह्रूं फट् स्वाहा।

ॐ क्लीं नमो भगवते कामदेवाय श्रीं सर्वजनप्रियाय सर्वजनसम्मोहनाय ज्वल-ज्वल-प्रज्वल-प्रज्वल हन-हन वद-वद तप-तप सम्मोह्य-सम्मोह्य सर्वजन मे वशं कुरु कुरु स्वाहा। ॐ ह्रां श्रीं व्रीं क्ष्म्रौं ह्स्त्रौं सहस्त्राराय ह्रूं फट् स्वाहा।

ॐ नमो विष्णवे। ॐ नमो नारायणाय। ॐ जय-जय गोपीजनवल्लभाय स्वाहा।

ॐ सहस्त्रार ज्वालावर्त्त क्ष्म्रौं हन हन हुं फट् स्वाहा।

ॐ तत् सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।

श्रीमन्नारायणस्यचरणौ शरणं प्रपद्ये । श्रीमते नारायणाय नमः ।
ॐ उग्रवीरं महाविष्णु ज्वलन्तं सर्वतोमुखं । नृसिंहं भीषणं भद्रं मृत्यु-मृत्युं नमाम्यहम् ॥
भगवन् सर्वविजय सहस्राराय राजित । शरणं त्वां प्रपन्नोऽस्मि श्रीकरं सुदर्शनम् ॥
अरूणी वारूणी चैव सविग्रहनिवारिणी । सर्वकर्मकरी देवी दुर्गे देवि नमोऽस्तुते ॥
ॐ भूः स्वाहा । ॐ भुवः स्वाहा । ॐ स्वः स्वाहा । ॐ भूर्भुवः स्वः स्वाहा । अष्टौ ब्राह्मणान् सम्यक् ग्राहयित्वा ततो महाविद्या सिद्ध्यति । आशीक्षितं नोपयुञ्जीत । अहं न जाने न च पार्वतीशः ।
एकविंशतिवाराणि परिजाप्य सुचिर्भवेत् । पत्रं पुष्पं फलं दद्यात् स्त्रियो वा पुरुषोऽपि वा ॥
अवश्यं वशमितयाहुरात्मना च परेण वा । महाविद्यावतां पुंसां मनः क्षेत्रं करोति यः ॥
सप्तरात्रौ व्यतीतायां शत्रूणां तद् विनश्यति ।
ॐ कुबेरं ते मुखं रौद्रं नन्दिमानन्दिमावह । ज्वरं मृत्युभयं घोरं विषं नाशय मे ज्वर ॥
ॐ नमो भगवते रुद्राय हृदये अमृताभिवर्षाय मम ज्वररोग शान्तिं कुरु कुरु स्वाहा ।
ॐ काल-काल महाकाल कालदण्ड नमोऽस्तु ते । कालदण्डानिपातेन भूम्यामन्तर्हितं ज्वरं हन्ति ॥

लिखित्वा यस्तु पश्यति—

ॐ समुद्रस्योत्तरे तीरे मारीचो नाम राक्षसः ।
तस्य मूत्रपुरीषाभ्यां हुताशनं शमय शमय स्वाहा ॥
हिमवत्युत्तरे पार्श्वे चपला नाम यक्षिणी ।
तस्या नुपूरशब्देन विशल्या भव गर्भिणी ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः ।
सः न पर्षदति दुर्गाणि विश्वानावेव सिन्धुं दुरितात्यग्निः ॥
ॐ भास्कराय विद्महे महाद्युतिकराय धीमिहि । तन्नः सूर्यः प्रचोदयात् ।
ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।
प्रतिकूलकारिणी नश्येत् । अनुकूलकारिणी अस्तु ।
ॐ महादेवी च विद्महे विष्णुपत्नि च धीमहि । तन्नो लक्ष्मीः प्रचोदयात् ।
ॐ ब्रूं ह्रीं श्रीं ब्रह्मकोशजी मां रक्ष-रक्ष हुं जटी स्वाहा ।
पञ्चम्यां च नवम्यां च दशम्यां च विशेषतः ।
पठित्वा तु महाविद्या श्रीकामः सर्वदा पठेत् ॥
ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥
श्रीर्मे भजतु अलक्ष्मीर्मे नश्यतु ।
यदन्ति यच्च दूरके भयं विन्दति मामिह ।
पवमान वितज्जहि यदुत्थितं दुःखं भवति तत्सर्वं शमय-शमय स्वाहा ।
ॐ गायत्र्यै स्वाहा । ॐ सावित्र्यै स्वाहा । ॐ सरस्वत्यै स्वाहा ।
ॐ तत्पुरुषाय विद्महे सहस्राक्षाय धीमहि । तन्नो इन्द्रः प्रचोदयात् ।
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ।

ॐ तत्पुरुषाय विद्महे वक्रतुण्डाय धीमहि । तन्नोदन्तिः प्रचोदयात् ।
ॐ तत्पुरुषाय विद्महे चक्रतुण्डाय धीमहि । तन्नो नन्दिः प्रचोदयात् ।
ॐ तत्पुरुषाय विद्महे महासेनाय धीमहि । तन्नो षण्मुखः प्रचोदयात् ।
ॐ तत्पुरुषाय विद्महे सुवर्णपक्षाय धीमहि । तन्नो गरुडः प्रचोदयात् ।
ॐ वेदात्मनाय विद्महे हिरण्यगर्भाय धीमहि । तन्नो ब्रह्मः प्रचोदयात् ।
ॐ नारायणाय विद्महे वासुदेवाय धीमहि । तन्नो विष्णुः प्रचोदयात् ।
ॐ मन्मथेशाय विद्महे कामदेवाय धीमहि । तन्नोऽनङ्गः प्रचोदयात् ।
ॐ वज्रनखाय विद्महे तीक्ष्ण दंष्ट्राय धीमहि । तन्नो नारसिंहः प्रचोदयात् ।
ॐ भास्कराय विद्महे तीक्ष्ण दंष्ट्राय धीमहि । तन्नो आदित्यः प्रचोदयात् ।
ॐ वैश्वानराय विद्महे लालीलाय धीमहि । तन्नो अग्निः प्रचोदयात् ।
ॐ कात्यायनाय विद्महे कन्यकुमारी धीमहि । तन्नो दुर्गिः प्रचोदयात् ।
ॐ क्रौं महाकालाय विद्महे महारुद्राय धीमहि । तन्नो महाकालः प्रचोदयात् ।
ॐ दक्षिणकालिकायै विद्महे ह्रीं श्मशानवासिन्यै धीमहि । तन्नो घोराप्रचोदयात् ।
ॐ आनन्देश्वरायै विद्महे सुधादेव्यौ च धीमहि । तन्नोऽर्धनारी प्रचोदयात् ।
ॐ ह्रंसो हंसाय विद्महे सोऽहं हंसाङ्गयै धीमहि । तन्नो हंसः प्रचोदयात् ।
ॐ ऐं ह्रीं श्रीं सिंहवाहिनी च विद्महे पञ्चवक्त्रायै धीमहि । तन्नो महाविद्याप्रचोदयात् ।

ॐ सहस्रपरमा देवी शतमूला शतंकुरा।
सर्वं हरतु मे पापं दुर्वा दुःस्वप्ननाशिनी॥
ॐ काण्डात् काण्डात् प्ररोहरन्ती परुषा परुषपरि।
एवानो दुर्गे प्रतनु सहस्रेण शतेन च॥
ॐ या शतेन प्रतनोषि सहस्रेण विरोदसि।
तस्यास्ते देवीष्टके विधेम हविषा वयम्॥
ॐ अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे।
शिरसा धारयिष्यामि रक्षस्व मां पदे-पदे॥
अत्रिणा त्वा क्रिमे हन्मि कण्वेन जमदग्निना।

ॐ विश्वावसोर्ब्रह्मणा हतः क्रमेण राजा अप्येषां स्थपतिर्हतः। अथो माता अथो पिता अथो स्थूला अथो क्षुद्रा अथो कृष्णाः अथो श्वेताः अथोः आशातिका हताः श्वेताभिः सह सर्वे हताः।

आहारावद्य श्रुतस्य हविषो यथा तत्सत्यं यदमुं यमस्य जृम्भयोः आदधामि तथा हि तत्।

खं खं म्रसि ब्रह्मणा त्वा शपामि ब्रह्मणस्त्वां शपथेन शपामि घोरेण त्वां भृगुणां चक्षुषा प्रेक्षे रौद्रेण त्वाऽङ्गिरसा मनसा ध्यायामि।

अघस्य त्वा धारया विध्यामि अधरो मत् पद्यस्वासौ उत्तुद शिमिजावरि तल्पेजे तल्प उत्तुद गिरीः रनुप्रवेशय मरीची रूपं संनुद यावदितः पुरस्तात् उदयाति सूर्यः तावदितोऽमुं नाशय योऽस्मान् द्वेष्टि यं च

वयं द्विष्मः खट् फट् जहि छिन्धि भिन्धि हन्धि कट् इति वाचः क्रुराणि परिबाहिणीदं नमस्ते अस्तु मा मा हिं सीः द्विषन्तं मेऽभिनाशय तं मृत्यो मृत्यवे नय अरिष्टं रक्ष अरिष्टं भञ्ज-भञ्ज स्वाहा।

ॐ ह्रीं कृष्णवाससे नारसिंहवदे महाभैरवि ज्वल-ज्वल विद्युज्ज्वल ज्वालाजिह्वे करालवदने प्रत्यङ्गिरे क्ष्म्रीं क्षम्यैं नमो नारायणाय घृणिः सूर्यादित्याय सहस्राक्षाय हूं फट् स्वाहा।

वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः, रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अव ब्रह्मद्विषो जहि।

ॐ सर्पोलुक-काक-कङ्क-कपोतादि वृश्चिकाग्रे-दंष्ट्रकराग्रविषान् मे महाभूत-प्रेत-पिशाच-ब्रह्मराक्षस-सकलकिल्विषादि-महारोगविषान् नीरोगविषं कुरु-कुरु स्वाहा।

अक्षिस्पन्दं च दुःस्वप्नं भुजस्पन्दं च दुर्मतिम्।
दुश्चिह्नं दुर्गतिं रोगं भयं नाशय शांकरी॥
महाविद्यां कृतवतो योस्माकं द्वैष्टि योऽरिष्ट स्मरति।
यावदेकविंशतिं कृत्वा तावदधिकं नाशय॥
ब्रह्मविद्यामिमां देवि नित्यं सेवेत यः सुधीः।
ऐहिकाऽऽमुष्मिकं सौख्यं सिद्ध्यन्त्येन न संशयः॥
एनां विद्यां महाविद्यां यो दूषयति मानवः।
सोऽवश्यं नाशमाप्नोति षण्मासादचिरेण वै॥

अग्रतः पृष्ठतः पार्श्वे ऊर्ध्वतो रक्ष मे सदा।
चन्द्रघण्टा विरूपाक्षी त्वां भजे जगदीश्वरीम्॥
एवं विधां महाविद्यां त्रिसन्ध्यं स्तौति मानवाः।
दृष्ट्वा जनैः दुष्टजनाः सर्वमोहवशं गताः॥
तामाग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम्।
दुर्गां देवीं शरणमहं प्रपद्ये सुतरां दुःशमनायै नमः॥
मातर्मे मधुकैटभघ्नि महिषप्राणापहारोद्यमे।
हेलानिर्मित धूम्रलोचनवधे हेचण्डमुण्डार्दिनी॥
निःशेषीकृत-रक्तबीजदनुजे नित्ये निशुम्भापहे।
शुम्भध्वंसिनी संहाराशु दुरितं दुर्गे नमस्तेऽम्बिके॥
कालदण्डपरं मृत्युविजया बन्ध्याम्यहम्।
कालदण्डकरालवदनो रक्तलोचन युगलभीषणाम्॥
पञ्चयोजनविस्तीर्ण मृत्योश्च मुखमण्डलम्।
तस्माद्रक्ष महाविद्ये भद्रकालि नमोऽस्तु ते॥
वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः।
सर्वबीजान्यवब्रह्मद्विषोजहि अब ब्रह्मद्विषो जहि॥

वारिजलोचन सहपासीगतिं वारया करनिकरैः ।
पूरितमेघद्रुगानां दापिता गोपकन्यके सहोदरेऽवतु ॥
वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्यवब्रह्मद्विषो अव ब्रह्मद्विषो जहि ॥

ॐ ह्रीं श्रीं क्लीं सिद्धलक्ष्मी स्वाहा । ॐ क्लीं ह्रीं श्रीं ।

ॐ आवहन्ती वितन्वाना कुर्वाणा चीरमात्मनः ।
वासांसि मम गावश्च अन्नपाने च सर्वदा ॥
ततो मे श्रियं आनिरियाय श्रियं वयो जरितृभ्यो दधाति ।
श्रियं वसाना अमृतत्वमायन् भवन्ति सत्या समिषा मितद्रौ ॥
श्रियं एवैनं तच्छ्रियामादधाति संतत मृचा वषट् ।
कृत्यं संतत्यै संधीयते प्रजया पशुर्भिय एवं वेद ॥

ॐ ह्रीं ह्रीं हूं श्रीं क्लीं क्लूं फ्रों आं ह्रीं क्रों हूं फट् स्वाहा ॥

वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः ।
रोहन्तु सर्वबीजान्यवब्रह्मद्विषो जहि अब ब्रह्मद्विषो जहि ॥
ॐ सह नाववतु सह नौ भुनक्तु सहवीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विहिषावहै ॥

ॐ शान्तिः शान्तिः शान्तिः । हरि ॐ । ॐ ॐ । श्रीदक्षिणामूतर्ये नमः ।
ॐ जय-जय श्रीवनदुर्गा सत्याःसन्तु श्रीवनदुर्गार्पणमस्तु ।

***

वनदुर्गाकवचम्

देव्युवाच

हे देवशङ्कर श्रीमत्प्राणनाथ महेश्वर । कवचं वनदुर्गाया कथ्यतां सिद्धिकारणात् ॥
मन्त्रेण म्रियते योगी कवचं रक्षयेत्ततः । अतो मे कवचं देव कथ्यतां मृत्युनाशनम् ॥

शिव उवाच

कथ्यते कवचं देव्या शृणु देवि समाहितः । उत्तिष्ठ रक्षा मे पादौ पुरुषि किं शिरो मम ॥
स्वपिषिभयं मे हस्तौ रक्ष रक्ष महेश्वरी । समुपस्थितं तद्यं मे हृदयं परिरक्षतु ॥
यदि शक्यमशक्यं वा सर्वतः परिरक्षतु । तन्मे भगवती श्रीमान् सर्वतः परिरक्षतु ॥
शमयाग्नि वधू पातु सर्वत्रैव जले स्थले । इतीदं वनदुर्गायाः कवचं भुवि दुलर्भम् ॥
न देयं परशिष्येभ्यो यदि जीवितुमिच्छति ॥

ॐ जय-जय श्रीवनदुर्गाकवचं सत्या सन्तुः श्रीवनदुर्गार्पणमस्तु ।

***

हवन-सामग्री

गाय का घी, गुग्गुल, श्वेतदूर्बा, कालातिल, पीपल की लकड़ी, अष्टगन्ध, केशर, कस्तूरी, अगर, तगर, जटामांसी, छड़ीला देविचन्दन, कर्पूर, रक्तचन्दन, श्वेतचन्दन, चावल, जायफल, लौंग, दालचीनी, पञ्चपल्लव, शमी, पलाश, अर्क, खादिर, नवग्रह की लकड़ी ।

नोट : *छड़ीला देविचन्दन एवं कपूर से यन्त्र निर्माण पीपल पत्र पर दाडिम की कलम से करना चाहिये ।*

***

श्रीशूलिनी दुर्गामहामन्त्र

विनियोगः— ॐ अस्य श्रीशूलिनी दुर्गामहामन्त्रस्य ब्रह्माऋषिः गायत्री छन्दः श्रीशूलिनी दुर्गा परमेश्वरी देवता हुं बीजम् मं शक्तिः स्वाहा कीलकम् मम शूलिनी दुर्गा प्रसाद सिद्ध्यर्थे जपे (पाठे) विनियोगः ।

करन्यासः—

ॐ श्री शूलिनी वरदे देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रां अङ्गुष्ठाभ्यां नमः ।

ॐ श्री शूलिनी वरदे देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रां तर्जनीभ्यां नमः ।

ॐ श्री शूलिनी युद्धप्रिये देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रूं मध्यमाभ्यां नमः ।

ॐ श्री शूलिनी महिषासुरमर्दिनी देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रैं अनामिकाभ्यां नमः ।

ॐ श्री शूलिनि विन्ध्यवासिनी यन्त्र-मन्त्र-तन्त्राकर्षिणि रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रां कनिष्ठिकाभ्यां नमः ।
ॐ श्री शूलिनि सर्वसिद्धिप्रदायिनी यन्त्र-मन्त्र-तन्त्राकर्षिणि रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रः करतलकरपृष्ठाभ्यां नमः ।
हृदयादिन्यासः—
ॐ श्री शूलिनि वरदे देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रां हृदयाय नमः ।
ॐ श्री शूलिनि वरदे देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रीं शिरसे स्वाहा ।
ॐ श्री शूलिनि युद्धप्रिये देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् हूं शिखायै वषट् ।
ॐ श्री शूलिनि महिषासुरमर्दिनी देवसिद्धसुरपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रैं कवचाय हुम् ।
ॐ श्री शूलिनि विन्ध्यवासिनी यन्त्रमन्त्रतन्त्राकर्षिणी नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रौं नेत्रत्रयाय वौषट् ।
ॐ श्री शूलिनि सर्वसिद्धिप्रदायिनी देवसिद्धसुपूजिते नन्दी रक्ष-रक्ष महायोगेश्वरी हुं फट् ह्रः अस्त्राय फट् ।
ध्यानम्—

विभ्राणां शूलबाणास्यभयवर गदाचाप पाशान्
कराग्रैः मेघश्यामा किरीटोल्लासितशशिकलाभूषणा ।
सिंहस्कन्धाधिरूढा चतसृभिरचितं खेटकं बिभ्रतीभिः
कन्याभिः भिन्न दैत्या भवतु भवभयध्वंसिनी शलिनी नः ॥

संहार मुद्रां प्रदर्श्य, योनिमुद्रां प्रणमेतं,

मानसोपचारपूजा— लं पृथिवीव्यात्मकं गन्धं श्रीशूलिनीदुर्गाप्रीतये परिकल्पयामि ।
हं आकाशात्मकं पुष्पं श्रीशूलिनीदुर्गाप्रीतये समर्पयामि ।
यं वायव्यात्मकं धूपं श्रीशूलिनीदुर्गाप्रीतये घ्रापयामि ।
रं वह्न्यात्मकं दीपं श्रीशूलिनीदुर्गाप्रीतये सन्दर्शयामि ।
वं अमृतात्मकं नैवेद्यं श्रीशूलिनीदुर्गाप्रीतये निवेदयामि ।
सं सर्वात्मकं मन्त्रपुष्पाञ्जलीं श्रीशूलिनीदुर्गाप्रीतये समर्पयामि ।

मूलमन्त्र—ॐ ऐं ह्रीं श्रीं दुं ज्वल-ज्वल शूलिनी दुष्टग्रहान् हुं फट् स्वाहा ।

करन्यासः— ॐ ऐं ह्रीं अङ्गुष्ठाभ्यां नमः । ॐ श्रीं दुं तर्जनीभ्यां नमः । ॐ ज्वल-ज्वल मध्यमाभ्यां नमः । ॐ शूलिनी अनामिकाभ्यां नमः । ॐ दुष्टग्रहान् कनिष्ठिकाभ्यां नमः । ॐ हुं फट् स्वाहा करतल कर पृष्ठाभ्यां नमः ।

हृदयादिन्यासः— ॐ ऐं ह्रीं हृदयाय नमः । ॐ श्रीं दुं शिरसे स्वाहा । ॐ ज्वल-ज्वल शिखायै वषट् । ॐ शूलिनी कवचाय हूम । ॐ दुष्टग्रहान् नेत्र त्रयाय वौषट् । ॐ हुं फट स्वाहा अस्त्राय फट् ।

तदनन्तर मूल मन्त्र का संकल्पानुसार अथवा एक माला जप करें ।

मूलमन्त्र—ॐ ऐं ह्रीं श्रीं दुं ज्वल-ज्वल शूलिनी दुष्टग्रहान् हुं फट् स्वाहा ।

पश्चात् एक माला, मालामन्त्र का जप करें ।

मालामन्त्रपाठ—ॐ नमो भगवति कङ्कालरात्रि दुं दुर्गे शुं शूलिनि बं बटुकभैरवि हुं फट् स्वाहा। ॐ नमो भगवति भद्रकालि कासकूटमोहिनी ऐं ह्रीं श्रीं इष्ट कामार्थ सिद्धि प्रदायिनि सकलज्ञापिनि संकामिणी ब्राह्मी-माहेश्वरी-कौमारी-वैष्णवी-वाराही-इन्द्राणी-चामुण्डा-भैरवेश्वरी आर्कषय-आर्कषय आवेशय-आवेशय केलय-केलय भाषय-भाषय ऐं ह्रीं श्रीं हन-हन सप्तमातृके हुं फट् स्वाहा।

ॐ नमो भगवति ह्रीं ज्वल-ज्वल शूलिनी संहारकालि अष्टभुजे शालिनी एहि-एहि आगच्छ आगच्छ आवेशय-आवेशय केलय-केलय-भाषय-भाषय बन्धय-बन्धय घातय-घातय छिन्धि-छिन्धि रा-रा-रा ग्राहय-ग्राहय सकलग्रहान् संहारय-संहारय भूतग्रह-प्रेतग्रह-पिशाचग्रह-ब्रह्मराक्षससमूह-डाकिनीग्रह - शाकिनीग्रह - काकिनीग्रह - राकिनीग्रह - हाकिनीग्रह - याकिनीग्रह - कालनिग्रह-महाकालनिग्रह-आवेशग्रह-अनावेशग्रह-स्वप्नग्रह-भोगग्रह-अपस्मारग्रह नित्यग्रह-सर्वग्रहान् संहारय-संहारय उच्चाटय-उच्चाटय नाशय-नाशय मारय-मारय शोषय-शोषय दह-दह पच-पच भक्षय-भक्षय खण्डय-खण्डय खड्गेन छिन्धि-छिन्धि शूलेन ताडय-ताडय पाशेन बन्धय-बन्धय अनकेन दह-दह ह्रीं दुर्गे बटुक भैरवि सकलग्रह संहारकारिणी भूतज्वर-प्रेतज्वर-पिशाचज्वर राक्षसज्वर-पित्तज्वर-वातज्वर-श्लैष्मिक ज्वर-सन्निपातिक ज्वर-एकाहिक ज्वर-द्वयाहिक ज्वर त्र्याहिकज्वर-चातुर्थिकज्वर-साप्ताहिकज्वर-पक्षज्वर-मासिकज्वर-त्रिमासिकज्वर-षण्मासिकज्वर-साम्वत्सरिक ज्वर-सर्वज्वरान् भञ्जय-भञ्जय कटिशूल-कुक्षिशूल-अङ्गशूल-पार्श्व शूल-पृष्ठशूल-शिरः शूलादि सर्वरोगान् संहारय-

संहारस्य ह्री दुर्गे परमन्त्र-परयन्त्र-परतन्त्र विद्या स्तम्भिनी स्वमन्त्र-स्वयन्त्र-स्वतन्त्रविद्याविवर्धिनी ॐ ह्रां ह्रीं ह्रुं ह्रूं फट् स्वाहा ।

इस प्रकार जपकर देवि के वाम हस्त में जप समर्पित कर योनि मुद्रा दिखायें।

गुह्यातिगुह्यगोपत्री न्वं गृहाणास्मत्कृतं जपम्। सिद्धिर्भवतु मे देवि सर्वकामफलप्रदा ॥

करन्यासः—**ॐ ऐं ह्रीं अङ्गुष्ठाभ्यां नमः । ॐ श्रीं दुं तर्जनीभ्यां नमः । ॐ ज्वल-ज्वल मध्यमाभ्यां नमः । ॐ शूलिनी अनामिकाभ्यां नमः । ॐ दुष्टग्रहान् कनिष्ठिकाभ्यां नमः । ॐ हुं फट् स्वाहा करतल कर पृष्ठाभ्यां नमः ।**

हृदयादिन्यासः— **ॐ ऐं ह्रीं हृदयाय नमः । ॐ श्रीं दुं शिरसे स्वाहा । ॐ ज्वल-ज्वल शिखायै वषट् । ॐ शूलिनी कवचाय हूम । ॐ दुष्टग्रहान् नेत्र त्रयाय वौषट् । ॐ हुं फट स्वाहा अस्त्राय फट् ।**

जय-जय-शूलिनी दुर्गार्पणमस्तु ।

***

परदेवीसूक्तम्

(परमदेवी सूक्तम्)

विनयोगः—ॐ अस्य श्रीपरदेवीसूक्त माला मन्त्रस्य मार्कण्डेय मेधसौ ऋषीः, गायत्र्यादि नाना विध छन्दांसि, त्रिशक्ति रूपिणी चण्डिका देवता, ऐं बीजम्, ह्रीं शक्तिः, क्लीं कीलकं, मम चिन्तित-सकल-मनोरथ-सिद्ध्यर्थे जपे (पाठे) विनियोगः ।

ऋष्यादिन्यासः—ॐ श्रीमार्कण्डेयमेधसऋषिभ्यां नमः शिरसि, ॐ गायत्र्यादि नाना विधछन्दोभ्यो नमः मुखे, ॐ त्रिशक्तिरूपिणी चण्डिकादेवतायै नमः हृदये, ॐ ऐं बीजाय नमः गुह्ये, ॐ ह्रीं शक्तये नमः पादयो, ॐ क्लीं कीलकाय नमः नाभौ, मम चिन्तितसकलमनोरथ सिद्ध्यर्थे जपे विनियोगाय नमः सर्वाङ्गे ।

करादिन्यासः—ॐ ऐं अङ्गुष्ठाभ्यां नमः, ॐ ह्रीं तर्जनीभ्यां नमः, ॐ क्लीं मध्यमाभ्यां नमः, ॐ ऐं अनामिकाभ्यां नमः, ॐ ह्रीं कनिष्ठिकाभ्यां नमः, ॐ क्लीं करतलकरपृष्ठाभ्यां नमः ।

हृदयादिन्यासः—ॐ ऐं हृदयाय नमः, ॐ ह्रीं शिरसे स्वाहा, ॐ क्लीं शिखायै वषट्, ॐ ऐं कवचाय हुम्, ॐ ह्रीं नेत्रत्रयाय वौषट्, ॐ क्लीं अस्त्राय फट् ।

दिङ्न्यासः—ॐ ऐं प्राच्यै नमः, ॐ ह्रीं आग्नेय्यै नमः, ॐ क्लीं दक्षिणायै नमः, ॐ ऐं नैर्ऋत्यै नमः, ॐ ह्रीं प्रतीच्यै नमः, ॐ क्लीं वायव्यै नमः, ॐ ऐं उदीच्यै नमः, ॐ ह्रीं ऐशान्यै नमः, ॐ क्लीं उर्ध्वायै नमः, ॐ ऐं ह्रीं क्लीं भूम्यै नमः; (आसन पर बैठे-बैठे सभी दिशाओं में दाहिने हाथ से चुटकी बजायें ।)

ध्यानम्— ॐ योगाढ्यामरकार्यनिर्गतमहातेजः समुत्पत्तनी,
भास्वत्पूर्णशशांक-चारूधवला लीलोत्लसत्भ्रूलता।
गौरी तुङ्गकुचद्वया तदुपरि स्फूर्जत्प्रभामण्डला,
बन्धूकारुणकाय कान्तिविलसच्छ्री चण्डिका सर्वतः॥

मानसोपचार पूजा— ॐ लं पृथिव्यात्मकं गन्धं श्रीपरमदेवीप्रीतये परिकल्पयामि नमः।
ॐ हं आकाशात्मकं पुष्पं श्रीपरमदेवीप्रीतये समर्पयामि नमः।
ॐ यं वायव्यात्मकं धूपं श्रीपरमदेवीप्रीतये घ्रापयामि नमः।
ॐ रं अग्न्यात्मकं दीपं श्रीपरमदेवीप्रीतये दर्शयामि नमः।
ॐ वं अमृतात्मकं नैवेद्यं श्रीपरमदेवीप्रीतये निवेदयामि नमः।
ॐ सं सर्वात्मकं मन्त्रपुष्पाञ्जलीं श्रीपरमदेवीप्रीतये समर्पयामि नमः।

ॐ ऐं ह्रीं क्लीं हुं सैं हूं ह्सौं स्त्रौं जय जय श्रीमहालक्ष्मी जगदाद्य बीजे सुरासुर-त्रिभवननिदाने, दयाकरे सर्व-सर्वतेजो रूपिणि, महामहामहिमे-महामहारूपिणि-महामहामाये महामायास्वरूपिणी विरञ्चिसंस्तुते, विधिवरदे चिदानन्दे-विष्णुदेहावृते, महामोहिनि (१०१) मधुकैटभजिघांसिनि, नित्य-वरदानतत्परे, महासुधाब्धिवासिनि-महामहातेजोधारिणी सर्वाधारे सर्वकारण कारणे, अचिन्त्यरूपे, इन्द्रादि निखिलनिर्जरसेविते, सामगान गायिनि पूर्णेन्द्रिय कारिणि, विजये, जयन्ति, अपराजिते,

सर्वसुन्दरि, रक्तांशुके (१९८) सूर्यकोटि संकाशे, चन्द्रकोटिसुशीतले, अग्निकोटि दहनशोले, यमकोटिक्रूरे, वायुकोटिवहनशोले, ओंकारनादरूपिणि, निगमागम मार्गदायिनि, महिषासुर निर्दलिनि, धूम्रलोचन क्षयपरायणे, चण्डमुण्डादि शिरच्छेदिनि, रक्तबीजादि रुधिरशोषिणि (२९८); रक्त-पानप्रिय महायोगिनि, भूत वैताल भैरवादि तुष्टि विधायिनि, शुम्भनिशुम्भ शिरच्छेदिनि, निखिलासुर खलखादिनि, त्रिदशराज्यदायिनि, सर्वस्त्रीरत्नरूपिणि दिव्यदेहे, निर्गुणे, सगुणे, सदसद्रूपधारिणी, स्कन्दवरदे, भक्तत्राणतत्परे, वरे, वरदे (३९७); सहस्राक्षरे अयुताक्षरे, सप्तकोटि चामुण्डारूपिणि, नवकोटि कात्यायनिस्वरूपे, अनेकशक्त्यालक्ष्यालक्ष्य स्वरूपे, इन्द्राणि, ब्रह्माणि, रुद्राणि, कौमारि, वैष्णवि, वाराहि, शिवदूति, ईशानि, भीमे, भ्रामरि, नारसिंहि, त्रयस्त्रिंशतकोटि देवसेविते, अनन्तकोटि ब्रह्माण्डनायिके (५०१); चतुरशीति लक्षमुनिजन संस्तुते, सप्तकोटि मन्त्रस्वरूपे, महाकालरात्रि प्रकाशे, कलाकाष्ठादिरूपिणि, चतुर्दशभुवन विभवकारिणी, गरुड़गामिनि, क्रोंकार हौंकार ह्रौंकार श्रींकार क्लौंकार जूंकार सौंकार ऐं क्लींकार कांकार ह्सौंकार नानाबीजकूट निर्मितशरीरे (६०१); नानाबीज मन्त्रराज विराजिते, सकलसुन्दरीगण सेविते, चरणारविन्दे, श्रीमहात्रिपुरसुन्दरी, कामेशदयिते, करणैक रस कल्लोलिनि, कल्पवृक्षाधः स्थिते, चिन्तामणि द्वीपावस्थिते, मणिमन्दिर-निवासे, चापनि, खड्गिणि चक्रिणि, दण्डिनि, शङ्खिनि, पद्मिनि (६९४); निखिल भैरवाराधिनि, समस्तयोगिनि, परिवृत्ते, कालिके, कालि तारे, तरले, सुतारे, ज्वालामुखि, छिन्नमस्तिके, भुवनेश्वरि, त्रिपुरे, लोकजननि, विष्णुवक्षः स्थलालङ्कारिणि, अजिते, अमिते, अमराधिपे, अनूपचरिते, गर्भवास-

दुःखपापहारिणि (७९२) मुक्ति क्षेत्राधिष्ठायिनि, शिवे, शान्तिकुमारीरूपे, देवीसूक्त दशशताक्षरे, चन्द्रि, चामुण्डे, महाकाली-महालक्ष्मी-महासरस्वती-त्रयीविग्रहे! प्रसीद-प्रसीद, सर्वमनोरथान्, पूरय-पूरय, सर्वारिष्टविघ्नाँश्छेदय-छेदय, सर्वग्रहपीड़ा ज्वरग्रहभयं विध्वंसय-विध्वंसय (९०१); सर्वत्र त्रिभुवन जीवजातं वशय-वशय, मोक्षमार्गान् दर्शय-दर्शय, ज्ञानमार्गं प्रकाशय-प्रकाशय, अज्ञानतमो नाशय-नाशय, धन-धान्यादि वृद्धिं कुरु-कुरु, सर्वकल्याणिनि! कल्पय-कल्पय, मां रक्ष-रक्ष सर्वापद्भ्यो निस्तारय-निस्तारय, मम वज्रशरीरं साधय-साधय, ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा (१०००) नमस्ते नमस्ते नमस्ते स्वाहा ॥

परं देव्या इदं सूक्तं यः पठेत् प्रयतो नरः।
सर्व सिद्धिमवाप्नोति सर्वत्र विजयी भवेत् ॥१॥
संग्रामेषु जयेच्छत्रून् मातङ्गानिव केसरी।
वशयेन्निखिलान् लोकान् विशेषेण महीपतीन् ॥२॥
त्रि कालं यः पठषन्नित्यं देव्याः सूक्तमिदं परम्।
तस्य विघ्नाः प्रलीयन्ते ग्रह पीडाश्च दारुणाः ॥३॥
पराभिचार शमनं पर कृत्या निवारणम्।
सर्व कल्याण निलयं देव्याः सन्तोष कारणम् ॥४॥
सहस्त्रावृत्तितो देवि! मनोरथ समृद्धिदम्।
द्विसहस्त्रावृत्ति जपात् सर्व सङ्कट नाशनम् ॥५॥

त्रि सहस्त्रावृत्तितस्तु वशं. कृद् राज योषिताम् ।
शत त्रयं जपेद् यस्तु वर्ष त्रयमतन्द्रितः ॥६॥
पश्येत् स चण्डिकां साक्षात् वरदान कृतोद्यमाम् ।
इदं रहस्यं परमं गोपनीयं प्रयत्नतः ॥७॥
न वाचं कस्यचिद् देवि ! निधानमिव सुन्दरि ॥ ॐ श्रीं ॥

ॐ जय जयश्री डामरतन्त्रे उमामहेश्वर संवादे श्रीपरदेवीसूक्तं सत्याःसन्तु श्रीदेव्यार्पणमस्तु ।।

***

रुद्रयामल तन्त्रोक्तम्

रुद्रचण्डी स्तोत्रम्

शिव उवाच

चण्डिका हृदयं न्यस्य शरणं यः करोत्यपि । अनन्तफलमाप्नोति देवि चण्डीप्रसादतः ॥१॥
रविवारे यदा चण्डीं पठेदागमसम्मताम् । नवावृत्ति फलं तस्य जायते नात्र संशयः ॥२॥
सोमवारे यदा चण्डीं पठेद्यस्तु समाहितः । सहस्त्रावृत्तिपाठस्य फलं जानीहि सुव्रते ॥३॥
कुजवारे जगद्धात्रीं पठेदागमसम्मताम् । शतावृत्ति फलं तस्य बुधे लक्षफलं ध्रुवम् ॥४॥

गुरौ यदि महामाये लक्षयुग्मफलं ध्रुवम्। शुक्रे देवी जगद्धात्री चण्डीपाठेन शङ्करि ॥५॥
ज्ञेयं तुल्यफलं दुर्गे यदि चण्डि समाहितः। शनिवारे जगद्धात्री कोट्यावृत्तिफलं ध्रुवम् ॥६॥
अतएव महेशानि यो वै चण्डीं समभ्यसेत्। स सद्यश्च कृताश्च राजराजाधिपोभवेत् ॥७॥
आरोग्यं विजयं सौख्यं वस्त्ररत्नप्रबालकम्। पठनाच्छ्रवणाच्चैव जायते नात्र संशयः ॥८॥
धनं धान्यं प्रबालं च वस्त्रं रत्नविभूषणम्। चण्डीश्रवणमात्रेण कुर्यात् सर्वं महेश्वरि ॥९॥
घोरचण्डी महाचण्डी चण्डमुण्डविखण्डिनी। चतुर्वक्त्रा महावीर्या महादेवविभूषिता ॥१०॥
रक्तदन्ता वरारोहा महिषासुरमर्दिनी। तारिणी जननी दुर्गा चण्डिका चण्डविक्रमा ॥११॥
गुह्यकाली जगद्धात्री चण्डी च यामलोद्भवा। श्मशानवासिनी देवी घोरचण्डी भयानका ॥१२॥
शिवा घोरा रुद्रचण्डी महेशगणभूषिता। जाह्नवी परमा कृष्णा महात्रिपुरसुन्दरी ॥१३॥
श्रीविद्या परमाविद्या चण्डिका वैरिमर्दिनी। दुर्गी दुर्गा शिवा घोरा चण्डहस्ता प्रचण्डिका ॥१४॥
माहेशी बगला देवी भैरवी चण्डविक्रमा। प्रमथैर्भूषिता कृष्णा चामुण्डा मुण्डमर्दिनी ॥१५॥
रणखण्डा चन्द्रघण्टा रणरामवरप्रदा। भरणी भद्रकाली च शिवा घोर भयानका ॥१६॥
विष्णुप्रिया महामाया नन्दगोपगृहोद्भवा। मङ्गला जननी चण्डी महा क्रुद्धभयङ्करी ॥१७॥
विमला भैरवी निद्रा जातिरूपा मनोहरा। तृष्णा निद्रा क्षुधा माया शक्तिर्माया मनोहरा ॥१८॥
तस्यै देव्यै नमस्तयै सर्वरूपेण संस्थिता। नमस्तस्यै नमस्तस्यै नमस्तस्यै नमो नमः ॥१९॥
इमां चण्डीं जगद्धात्रीं ब्राह्मणस्तु सदा पठेत्। नाऽन्यांस्तु पाठयेद् देवि पठने ब्रह्महा भवेत् ॥२०॥

यः शृणोति धरायां च मुच्यते सर्वपातकैः । ब्रह्महत्या च गोहत्या स्त्रीवधोद्भवपातकम् ॥२१॥
श्वश्रूगमनपापं च कन्यागमनपातकम् । तत्सर्वं पातकं दुर्गे मातृगमनपातकम् ॥२२॥
सुतस्त्रीगमने चैव यद्यत्पापं प्रवर्तितम् । परदारकृतं पापं तत्क्षणादेव नश्यति ॥२३॥
जन्म-जन्मान्तरात्पापाद् गुरुहत्यादिपातकम् । मुच्यते मुच्यते देवि गुरुपत्नीसुसङ्गमात् ॥२४॥
मनसा वचसा पापं यत्पापं ब्रह्महिंसने । मिथ्यायाश्चैव यत्पापं यत्पापं नश्यति क्षणात् ॥२५॥
श्रवणं पठनं चैव यः करोति धरातले । स धन्यश्च कृतार्थश्च राजराजाधिपो भवेत् ॥२६॥
यः करिष्यत्यविज्ञाय रुद्रयामलचण्डिकाम् । पापैरेतैः समायुक्तो रौरवं नरकं व्रजेत् ॥२७॥
अश्रद्धया च कुर्वन्ति तेन पातकिनो नरः । रौरवं नरकं कुण्डं कृमिकुण्डमलस्य वै ॥२८॥
शुक्रस्य कुण्डं स्त्रीकुण्डं यान्ति ते ह्यचिरेण वै । ततः पितृगणैः सार्धं विष्ठायां जायते कृमि ॥२९॥
शृणु देवि महामाये चण्डीपाठं करोति यः । गङ्गायां चैव यत्पुण्यं काश्यां विश्वेश्वराग्रतः ॥३०॥
प्रयागे मुण्डने चैव हरिद्वारे हरेर्गृहे । तस्य पुण्यं भवेद्देवि सत्यं दुर्गे रमे शिवे ॥३१॥
त्रिगयायां त्रिकाश्यां वै यत्र पुण्यं समुपस्थितम् । तच्च पुण्यं तच्च पुण्यं तच्च पुण्यं न संशयः ॥३२॥
भवानी च भवानी च भवानी चोच्यते बुधैः । भकारस्तु भकारस्तु भकारः केवलः शिवः ॥३३॥
वाणी चैव जगद्धात्री वरारोहे भकारकः । प्रेतवद् देवि विश्वेशि भकारः प्रेतवत्सदा ॥३४॥
आरोग्यं च जयं पुण्यं ततः सुखविवर्धनम् । धनं पुत्रं जरारोग्यं कुष्ठं गलितनाशनम् ॥३५॥
अर्द्धाङ्गरोगान्मुच्येत दद्रुरोगाश्च पार्वति । सत्यं सत्यं जगद्धात्री महामाये शिवे शिवे ॥३६॥

चण्डे चण्डि महारावे चण्डिकाव्याधिनाशिनी । मन्दे दिने महेशानि विशेषफलदायिनी ॥३७॥
सर्वदुःखाद्विमुच्यते भक्त्या चण्डीं शृणोति यः । ब्राह्मणो हितकारी च पठेन्नियतमानसः ॥३८॥
मङ्गलं मङ्गलं ज्ञेयं मङ्गलं जयमङ्गलम् । भवेद्धि पुत्र-पौत्रैश्च कन्यादासादिभिर्युतः ॥३९॥
तत्त्वज्ञानेन निधनं कालनिर्वाणमाप्नुयात् । मणिदानोद्भवं पुण्य तुलाहिरण्यके तथा ॥४०॥
चण्डीश्रवणमात्रेण पठनाद् ब्राह्मणोऽपि च । निर्वाणमेति देवेशि महास्वस्त्ययने हितः ॥४१॥
सर्वत्र विजयं याति श्रवणाद् गृहदोषतः । मुच्यते च जगद्धात्रि राजराजाधिपो भवेत् ॥४२॥
महाचण्डी शिवा घोरा महाभीमा भयानका । काञ्चनी कमला विद्या महारोगविमर्दिनी ॥४३॥
गुह्यचण्डी घोरचण्डी चण्डी त्रैलोक्यदुर्लभा । देवानां दुर्लभा चण्डी रुद्रयामलसम्मता ॥४४॥
अप्रकाश्या महादेवी प्रियारावणामर्दिनी । मत्स्यप्रिया मांसरता मत्स्यमांसबलिप्रिया ॥४५॥
मदमत्ता महानित्या भूतप्रमथसम्मता । महाभागा महारामा धान्यदा धनरत्नदा ॥४६॥
वस्त्रदा मणिराज्यापि सदा विषयवर्द्धिनी । मुक्तिदा सर्वदा चण्डी महाविषयनाशिनी ॥४७॥
इमां हि चण्डीं पठते मनुष्यः शृणोति भक्त्या परमां शिवस्य ।
चण्डीं धरण्यां भवति पुण्ययुक्तां स वै न गच्छेत्परमन्दिरे किले ॥४८॥
जप्यं मनोरथं दुर्गे तनोति धरणीतले । रुद्रचण्डीप्रसादेन किं न सिद्ध्यति भूतले ॥४९॥
रुद्रध्येया रुद्ररूपा रुद्राणी रुद्रवल्लभा । रुद्रशक्ती रुद्ररूपा रुद्रमुखसमन्विता ॥५०॥
शिवचण्डी महाचण्ड-शिवप्रेत-गणान्विता । भैरवी परमा विद्या महाविद्या च षोडशी ॥५१॥

सुन्दरी परमा पूज्या महात्रिपुरसुन्दरी। गुह्यकाली भद्रकाली महाकालविमर्दिनी ॥५२॥
कृष्णा तृष्णा स्वरूपा सा जगन्मोहनकारिणी। अतिमन्त्रा महालज्जा सर्वमङ्गलदायिनी ॥५३॥
घोरतन्त्री भीमरूपा भीमादेवी मनोहरा। मङ्गला बगला सिद्धिदायिनी सर्वदा शिवा ॥५४॥
स्मृतिरूपा कीर्तिरूपा योगार्द्रैरपि सेविता। भयानका महादेवि भयदुःखविनाशिनी ॥५५॥
चण्डिका शक्तिहस्ता च कौमारी सर्वकामदा। वाराही च वराहास्या इन्द्राणी शक्रपूजिता ॥५६॥
माहेश्वरी महेशस्य महेशगणभूषिता। चामुण्डा नारसिंही च नृसिंहशत्रुमर्दिनी ॥५७॥
सर्वशत्रुप्रशमनी सर्वारोग्यप्रदायिनी। इति सत्यं महादेवि सत्यं सत्यं वदाम्यहम् ॥५८॥
नैव शोकं नैव रोगं दुःखं भयं तथा। आरोग्यं मङ्गलं नित्यं करोति शुभमङ्गलम् ॥५९॥
महेशानि वरारोहे ब्रवीमि सत्यमुत्तमम्। अभक्ताय च दातव्यं मम प्राणाधिकं शुभम् ॥६०॥
तव भक्ताय शान्ताय शिवविष्णुप्रियाय च। दद्यात् कदाचिद् देवेशि सत्यं सत्यं महेश्वरी ॥६१॥
अनन्तफलमाप्नोति शिवचण्डीप्रसादतः। अश्वमेधे वाजपेय-राजराजशतानि च ॥६२॥
तुष्टाश्च पितरो देवास्तथा च सर्वदेवताः। दुर्गेयं मृण्मयीज्ञानं रुद्रयामलपुस्तकम् ॥६३॥
मन्त्रमक्षरसंज्ञातं करोत्यपि नराधिपः। अत एव महेशानि किं वक्ष्ये तव सन्निधौ ॥६४॥
लम्बोदराधिकश्चण्डी पठनाच्छ्रवणात्तु यः। तत्त्वमस्यादिवाक्येन मुक्तिं प्राप्नोति दुर्लभाम् ॥६५॥

ॐ जय जय श्रीरुद्रचण्डीस्तोत्रं सत्याःसन्तु श्रीचण्डीदेव्यार्पणमस्तु।

***

परिशिष्टम्

चोरी हुयी या खोई हुई वस्तु हेतु कार्त्तवीर्याजुन मंत्र का जप करना चाहिए ।

ॐ नमो भगवते कार्त्तवीर्याय-अर्जुनाय महाभुज परिवाराय सप्तद्वीपास्मद्विलुम्पकान् चौरान् दशदिक्षु बन्ध-बन्ध चौरान् धरित्रीं धरित्रीं ठं ठं ठं ॐ फ्रों चीं क्लीं भ्रूं आं ह्रीं क्रोंश्रीं हूं फट् स्वाहा ।

आपदा निवारण, संकट मुक्ति के लिए बटुकभैरवमन्त्र का जप करना चाहिए ।

ॐ श्रीं ह्रीं क्लीं क्ष्म्रूं बं बटुकायआपदुद्धारणाय कुरू-कुरू बटुकाय ॐ ह्रीं क्रों वषट् स्वाहा ।

समस्त कार्यों की सिद्धि के लिए निम्नांकित मन्त्र का जप करना चाहिए ।

सर्वमङ्गमाङ्गल्ये शिवे सर्वार्थ साधिके । शरण्ये त्रयम्बिके गौरि नारायणि नमोस्तु ते ॥

धन धान्य, सौभाग्यवृद्धि एवं पुत्र प्राप्ति हेतु निम्नांकित मन्त्र से सम्पुटित दुर्गासप्तशती का पाठ करना चाहिये ।

आयुर्विद्यां च सौभाग्यं धान्यं च धनमेव च । सदाशिवं पुत्रवृद्धिं देहि मे चण्डिके शुभे ॥

शत्रुओं पर विजय प्राप्ति हेतु बगलामुखी मन्त्र का जप करना चाहिये।

ॐ ह्रीं क्लीं बगलामुखि सर्वदुष्टानां वाचं मुखं पदं स्तम्भय जिह्वां कीलय बुद्धिं विनाशय क्लीं ह्रीं ॐ ।

अकाल मृत्यु से मुक्ति हेतु मृत्युञ्जय मन्त्र का जप करना चाहिये।

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् । उर्वा रुकमिव बन्धनान् मृत्योर्मुक्षीय मामृतात् ॥

वर्षा होने के लिये निम्नलिखित मन्त्र का जप करना चाहिये ।

वर्षन्तु ते विभावरि दिवो अभ्रस्य विद्युतः । रोहन्तु सर्वबीजान्यव ब्रह्माद्विषो जहि अव द्विषो जहि ॥

***

हमारे महत्वपूर्ण प्रकाशन

बगलामुखीस्तोत्रम् । (बगलाब्रह्मास्त्रकवच, बगलाप्रत्यङ्गिरासहित) । सम्पादक - ओमप्रकाश मिश्र शास्त्री
महाविद्यास्तोत्रम् । सम्पादक - ओमप्रकाश मिश्र शास्त्री
हनुमद् - अघोरास्त्रम् । सम्पादक - ओमप्रकाश मिश्र शास्त्री
हनुमत् कवचम् । (एकमुखी [illegible] सहित)। सम्पादक - ओमप्रकाश मिश्र शास्त्री
दत्तात्रेयवज्रकवचम् । सम्पादक - ओमप्रकाश मिश्र शास्त्री
महाकालभैरवस्तोत्रम् । सम्पादक - ओमप्रकाश मिश्र शास्त्री
श्रीपञ्चमुखी हनुमान शतक। रचयिता - मन्त्रदास
श्रीसूक्तम् । (महालक्ष्मीध्यान [illegible] सम्पुट-लक्ष्मीसूक्त-पुरुषसूक्त सहित) । सम्पादक - ओमप्रकाश मिश्र शास्त्री
प्रत्यङ्गिरास्तोत्रम् । (हिन्दी [illegible] सहित) । सम्पादक - पण्डित शिवदत्त मिश्र शास्त्री
ललितासहस्रनामस्तोत्रम् । [illegible] । सम्पादक - ओमप्रकाश मिश्र शास्त्री
दुर्गासप्तशती । (प्रथम और [illegible] श्लोकों के साथ) । सम्पादक - रघुनाथ दूबे, ओमप्रकाश मिश्र शास्त्री
विलोमदुर्गासप्तशती । (प्रथम और अन्त के श्लोकों के साथ) । सम्पादक - रघुनाथ दूबे, ओमप्रकाश मिश्र शास्त्री
मन्त्रप्रतिलोमदुर्गासप्तशती । सम्पादक - ओमप्रकाश मिश्र शास्त्री
विन्ध्याचल माहात्म्यम् । औशनसपुराणान्तर्गत । हिन्दी टीका सहित । टीकाकार-रघुनाथ दूबे । सम्पादक - ओमप्रकाश मिश्र शास्त्री

प्राप्तिस्थान- विश्वभारती संस्कृत संस्थान
दौलतपुर रोड (आवास विकास कालोनी के पास), पाण्डेयपुर, वाराणसी-221002
सम्पर्क सूत्र - 9450557685, ईमेल - vbss591@gmail.com

वनदुर्गा

मूल्य : 30.00